IJARSCT
International Journal of Advanced Research in Science, Communication and Technology
International Open-Access, Double-Blind, Peer-Reviewed, Refereed, Multidisciplinary Online Journal
ISSN: 2581-9429
Volume 5, Issue 5, December 2025
Impact Factor: 7.67

# श्रीमद्भगवद्गीतायां कर्मयोगः

तीजराम वर्मा

शोधच्छात्रःसंस्कृत विभाग

पौडी परिसर हेमवती नन्दन बहुगुणा गढवाल विश्वविद्यालय, श्रीनगरं, गढवाल, उत्तराखण्ड

atirtharamji@gmail.com

**सारः** - संसारस्य प्रत्येकं जनानां मनसि जीवनस्य, जगतः, ईश्वरस्य सम्बन्धे संशयो भवत्येव। किमुचितं, किमनुचितं, जीवनं किं , कश्च मृत्युरित्यादयः प्रश्नाःसामान्यजनान् विदुषश्च कदाचित् न कदाचित् स्पृशन्त्येव। अनुत्तरेषु च प्रश्नेषु मनसि खिन्नताऽपि भवति। जीवनस्य सर्वेषां समस्यानां समाधानं साकल्येन सारल्येन च यत्र मिलति सा अस्ति श्रीमद्भगवद्गीता ।

श्रीमद्भगवद्गीता वस्तुतो महाभारतस्यैवांशःपरं महत्त्वात् पृथक्रूपेण प्रसिद्धं। महाभारते भीष्मपर्वणि पञ्चविंशतितमादध्यायाद् (२५) द्वाचत्वारिंशत्तमाध्यायः श्रीमद्भगवद्गीता इति नाम्ना प्रसिद्धम् । अस्यां गीतायां सप्तशती (७००) श्लोकाःसन्ति। तेषु श्लोकेषु चतुस्सप्तत्युत्तरं पञ्च शतं (५७४) श्लोका भगवतः श्रीकृष्णस्योपदेशरूपेण , चतुरशीतिः(८४) श्लोका अर्जुनस्य प्रश्नरूपेण , संजयस्य एकचत्वारिंशत् श्लोकाःसन्ति। एकः श्लोकः धृतराष्ट्रमुखेन विद्यते।

**कर्म एव योगः कर्मयोगः ,** कर्म एवंप्रकारेण कर्त्तव्यं यत् कर्म योगःस्यात्। यथा कश्चित् समाधिप्राप्तो योगी सर्वथा समतायुक्तः, अक्षुब्धो भवति तथैव यदि कोऽपि कर्म कुर्वन् भवति स कर्मयोगी। गीतायां निष्कामकर्म कर्मयोगः कथ्यते। केवलं कर्म अर्थात् आसक्तियुक्तं कर्म बन्धनस्य कारणं भवति कर्मयोगो बन्धनस्य कारणं न भवति परमात्मसाक्षात्कारस्य साधनमेव भवति।

Copyright to IJARSCT
www.ijarsct.co.in
DOI: 10.48175/568

**आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते।**

**योगारूढस्य तस्यैव शमः कारणमुच्यते॥[1]**

**सङ्केतशब्दः** - श्रीमद्भगवद्गीता, कर्मयोगः, निष्कामकर्म, महाभारतम्, जीवनम्, ईश्वरः, समाधिः।

"यही एक ऐसा ग्रन्थ है जिसमें दर्शन,धर्म और नीतिशास्त्र का समन्वय हुआ है।" इयमुक्तिर्गीताविषये महतः शिक्षकस्य , दार्शनिकस्य सर्वपल्लीराधाकृष्णस्यास्ति।

श्रीमद्भगवद्गीतायां यस्य पुनःपुनरूपदेशोऽस्ति तदस्ति कर्म। गीतायां भगवान् निरन्तरं किंकर्त्तव्यविमूढं अर्जुनं कर्मार्थं प्रेरयति। सर्वे कर्मणा परस्परं सम्बन्धिताः। कर्म विना शरीरस्यापि निर्वाहो न भवितुमर्हति। कर्मविषये एको निश्चितःसिद्धान्तोऽस्ति संसारे सर्वे जनाः प्रतिक्षणं किमपि कर्म कुर्वन्त्येव। शरीरं ,मस्तिष्कं, मनः, सर्वं प्रकृतेर्निर्मितं। प्रकृतेस्त्रयो गुणाः सन्ति सत्त्वं, रजः, तम इति। गुणानां प्रभावात् प्रतिक्षणं कायिकं ,वाचिकं , मानसिकं वा कर्म भवति। यदि कोऽपि अविवेकातदेवं इच्छति यदहं कर्म न करिष्यामि पुनरपि तं प्रकृतिःकर्म कारयिष्यति ।

**न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्।**

**कार्यते ह्यवशःकर्म सर्वःप्रकृतिजैर्गुणैः॥[2]**

**स्वाभावजेन कौन्तेय निबद्धः स्वेन कर्मणा।**

**कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत्॥[3]**

[1] ०६/०३ श्रीमद्भगवद्गीता

[2] ०३/०५ श्रीमद्भगवद्गीता

बहूनि कर्माणि भवन्ति तानि त्रिधा विभक्ततुं शक्नुमः - निषिद्धकर्म , काम्यकर्म , कर्त्तव्यकर्म ।

**निषिद्धकर्म** - चौर्यं,व्यभिचारः,हिंसा,असत्यभाषणं, कुटिलता,छलः,अभक्ष्यभक्षणमादि कर्म निषिद्धकर्म अस्ति।

**काम्यकर्म**- स्त्रीपुत्रधनादिप्रियवस्तूनां प्राप्त्यर्थं यत् कर्म क्रियते तत् काम्यकर्म ।

**कर्त्तव्यकर्म** - ईश्वरभक्तिः, अध्ययनं, देवपूजनं,यज्ञः,दानं,तपः, मातापितागुरूणां सेवा, शरीरसम्बन्धिभोजनादि कर्म कर्त्तव्यकर्म कथ्यते ।

एषु त्रिषु कर्मसु निषिद्धकर्म सर्वैःसर्वथा त्याज्यम्। मोक्षार्थिनां कृते काम्यकर्मापि न आवश्यकम्। कर्त्तव्यकर्म द्विधा भवति सकामकर्म , निष्कामकर्म । यदा कर्त्तव्यकर्मणामनुष्ठानं लौकिककामनया भवति तदा कर्त्तव्यकर्म सकामकर्म भवति । निष्कामकर्म एव कर्मयोगः कथ्यते -

**इज्याध्ययनदानानि तपःसत्यं,दया,क्षमा।**
**अलोभ इति मार्गोऽयं धर्मस्याष्टविधःस्मृतः॥**
**तत्र पूर्वश्चतुर्वर्गो दम्भार्थमपि सेव्यते ।**
**उत्तरस्तु चतुर्वर्गो महात्मन्येव तिष्ठति॥**[4]

**कर्मयोगः-**

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।**
**मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥**[5]

---

[3] १८/६० श्रीमद्भगवद्गीता

[4] ०३-५५,५६ विदुरनीति

अयं भगवद्गीतायाः प्रसिद्धतमःश्लोकः। अस्मिन्नेकस्मिन् श्लोके सम्पूर्णभगवद्गीतायां वर्णितस्य कर्मयोगस्य सारः समाहितः। बुद्धिमद्भिर्जनैः फलं प्रति आसक्तिं त्यक्तवा एव कर्म कर्त्तव्यमस्ति। वयं प्रतिदिनं जीवने पश्यामो यत् कर्म एवास्माकं हस्तेऽस्ति फलमस्माकं हस्तेऽस्त्येव न ,फलं बहुभिः कारकैः प्रभावितं भवति तेषु कारकेषु वशो नास्त्यस्माकं । वयं कृषिकर्म कुर्मस्तदस्माकं हस्तेऽस्ति परन्तु तस्य फलं नास्ति यतो हि करकानिपातनं, असमये वृष्टिः, समयेऽनावृष्टिः,अल्पवृष्टिः,अतिवृष्टिर्वा स्यात् तर्हि वयं किं कर्तुं शक्नुमः?किमपि न , यतोऽहि तत्र वश एव नास्ति । यदा कर्म एवास्माकं हस्तेऽस्ति तर्हि फलासक्तिं कृत्वा किमर्थं शक्तेरपव्ययं कर्तव्यम्। गीता अस्मान् यथार्थस्थितिं स्वीकर्तुं प्रेरयति - **कर्मण्येवाधिकारस्ते** । कर्म कुर्वन् फलेऽनाधिकारभाव एव जीवने यथार्थदृष्टिरस्ति। सर्वे फलमिच्छन्ति परं फले तेषामधिकारो नास्ति ।

यदि कर्मणःप्राक् फलासक्तिःप्रबलं भविष्यति तर्हि कर्मसम्पादन एकाग्रता न भविष्यति। तत्त्वतो मनुष्यस्य प्रयत्नःसाक्षात् कर्मणा सह सम्बद्धः न फलेन। यदा कर्म सुष्ठरूपेण सम्पादितं भविष्यति तदा तस्य कर्मणः फलेन सह सम्बन्धः स्वत एव भविष्यति परन्तु फलासक्तिःसहजप्रक्रियां बाधते। फलासक्त्या कर्मणि ध्यानाभावात् कर्म सम्पन्नमेव न भवति, अथवा सुष्ठु सम्पन्नं न भवत्यसंपन्ने कर्मणि फलस्य सम्भावना एव न भविष्यति। फलासक्तिं विना पूर्णमनोयोगेन कृतस्य कर्मणःफलेन सह साक्षात् सम्बन्धात् फलं मिलिष्यत्येव। तस्माद् भगवता उक्तम् - **मा फलेषु कदाचन** ।

---

[5] ०२.४७ श्रीमद्भगवद्गीता

यो जनःकर्मफलेन प्रेरितःसन् कार्यमारभते स यदि फलं न लभते तर्हि मानसिकदैन्यमवसादं गच्छति । यदि फलं लभते तर्हि मनसि गर्वो हर्षातिरेको भवति। मनसि समता स्यादेतदर्थं भगवता श्रीकृष्णेनोक्तम् -

**मा कर्म्मफलहेतुर्भूः**।

भगवतःश्रीकृष्णस्योपदेशःफलासक्तित्यागार्थमस्ति न कर्मत्यागार्थम् । कर्त्तव्यपराङ्मुखतायां तव प्रीतिर्न स्यात्। अकर्मण्यता घोरं पापं । वेदेऽपि कथितम् - अकर्मा दस्युः(१०/२२/८)।

**मा ते सङ्गोऽस्त्वकर्मणि**।

अतो वक्तुं शक्नुमःकर्मयोगःफलासक्तित्यागार्थं ,पूर्णमनोयोगेन कर्मकरणार्थं परिणामे च समतार्थमस्ति।

सन्दर्भग्रन्थसूची

१. श्रीमद्भगवद्गीता महर्षिवेदव्यासः,स्वामी रामदेवः, प्रकाशकः, हरिद्वारम्, दिव्यप्रकाशनम् प्रकाशनवर्षं संवत् २०७५
२. श्रीमद्भगवद्गीता शाङ्करभाष्यम् , आचार्यः शङ्करः/श्रीहरिकृष्णदास गोयन्दका,प्रकाशकः-गोरखपुर,गीताप्रेस, प्रकाशनवर्षं संवत् २०७४
३. कर्मयोग का तत्त्व ,जयदयाल गोयन्दका, प्रकाशकः,गोरखपुर, गीताप्रेस, प्रकाशनवर्षं संवत् २०७५
४. महाभारतम्, वेदव्यासः/सातवलेकर दामोदरः, स्वाध्याय भवनम्, पारडी महाराष्ट्रः, 1969 सन्।
५. अष्टाध्यायी, पण्डित ब्रह्मदत्तः जिज्ञासुः, रामलाल कपूर ट्रस्ट, हरियाणा, 2009 सन्।